फलम् । ग्रहवर्गाष्टकं स्पष्टं तस्माद्दिनफलं वदेत् ॥ ताजिकाज्जन्मलग्नस्य साधनञ्च परिस्फुटम् । वर्षमासदिवालग्नन्तद्दशान्तत्फलन्ततः ॥ छायोत्पत्तिं त्रिधा वक्ष्ये विषुमध्ये दिनेष्टकम् । दिनमानं दिनं भुक्तमुदयभं घटीषु च सिद्धच्छायात्रिषष्टिञ्च दृष्टमासप्रविंशति । लग्नोदयान् स्वदेशीयान् तेभ्योलग्नस्य साधनम् ॥ लग्नमानन्तथा होराद्रेष्काणं सप्तमांशकम् । नवांशं द्वादशं त्रिंशम् उदये सप्तसाधनम् ॥ तिथेः प्रकरणं वक्ष्ये वारनक्षत्रयोगजम् । योगाख्यं करणाख्यञ्च मुहूर्त्तान् संक्रमोद्भवम् ॥ चन्द्रताराबलञ्चैव पक्षभेदेन संयुतम् । शुभाशुभांश्च योगांश्च तिथिवारर्क्षयोगजान् ॥ सिद्धं संवर्त्तकञ्चैव तथा वारशुभाशुभम् । अवमन्त्रिदिनं वक्ष्ये ततो योगन्त्रिपुष्करम् ॥ यमघण्टं यमदंष्ट्रां क्रकचार्गलपातकान् । कुमारन्तरुणं वृद्धं मूलातिमूलयोगिनीम् ॥ वारमूलन्तथा कालं कालवेलां परिस्फुटम् । कालहोरार्द्धयामञ्च कुलिकङ्कण्टकद्वयम् ॥ फलं ग्रहस्य धिष्ण्यस्य वत्सभार्गवयोः फलम् । दशां चान्तर्दशां स्थूलां वक्रातिचारयोः फलम् ॥ पीडास्थानानि खेटानां ग्रहावस्थां तथैवच । भावफलं सन्धिफलं लतावेधमुपग्रहान् ॥ शीघ्रवक्रग्रहोद्देशङ्गोचरं गोचरव्यधम् । विवाहञ्च प्रतिष्ठाञ्च दीक्षायात्राप्रवेशनम् ॥ वास्तुदीपोर्द्धविन्यासं कालविंशोपकांस्तथा । जलयोगार्घकाण्डञ्च वर्षमासदिनार्द्धकत् ॥ तिथ्यादिपञ्चकं खेटञ्चन्द्रन्तत्काल सम्भवम् । अवस्थानष्टमुष्टिञ्च लोकचिन्तां वदाम्यहम् ॥ अङ्गस्पन्दादि सर्वाणि कालचिह्नानि यानि च । दुष्टरिष्टान्यहं वक्ष्ये तथा तेषाञ्च शान्तिकम् ॥ ज्योतिरङ्गमिदं सर्वं ये जानन्ति मनीषिणः । दीपवत्तान्विजानीयान्मोहान्धकारनाशने" इति ॥

गर्गसंहितायां तु चतुर्विंशतिसंख्यानि अङ्गानि उपाङ्गानि चत्वारिंशदिति ज्योतिरङ्गानि चतुःषष्टिविधान्युक्तानि यथा "यथैव वेदस्याङ्गानि षडुक्तानि मनीषिभिः । चतुःषष्टिस्तथाङ्गानि ज्योतिषस्य विदुर्बुधा" इत्युपक्रमत्र गणितज्ञानपूर्व्वकं तज्ज्ञानमावश्यकमित्युक्त्वा तद्विभागा दर्शिता यथा "तस्मात् कृत्स्नमधीत्याग्रे वेदाङ्गं कालसाधनम् । ज्योतिषामयनाङ्गानि चतुःषष्टिन्ततः पठेत् । येषामग्रे कर्मगुणौ चन्द्रलग्ने त्वनन्तरम् । नक्षत्रकेन्द्रभे चैव द्विवर्गः प्रथमः स्मृतः । राहौ बृहस्पतौ शुक्रे, धूमकेतौ शनैश्चरे । अङ्गारके बुधेऽर्के च चारानष्टौ ततः पठेत् । चक्रेष्वनन्तरं चक्रं मृगचक्रं तथैव च । श्वचक्रं वातचक्रं च चक्राङ्गेषु चतुष्टयम् । वास्तुविद्याङ्गविद्या च वायसानाँ तथैव च । ज्ञेयास्त्रिस्रस्तु विद्यैता वृद्धगर्गमताः शुभाः । स्वातीयोगं तथाषाढ़ारोहिण्यायोगमेव वा । एतान् कृत्स्नान् विजानीयात् भयोगान् वै विशेषतः । रहस्यं चेतीहाङ्गानि चतुर्विंशतिरीरिताः । अतऊर्द्ध्वं प्रवक्ष्यामि उपाङ्गानीह नामतः । अनुपूर्व्वाद्विधानेन चत्वारिंशद्धि नामतः । ग्रहकोशो ग्रहयुद्धं ग्रहशृङ्गाटकं तथा । कृत्स्नं ग्रहेश्वराणाञ्च ग्रहपाकास्तथैव च । विपथाश्चाग्निवर्षाश्च सेनाव्यूहस्तथैव च । मयूरचित्रोपनिषदुपहारप्रशान्तयः । तत्रान्तिके तुलाकोशोद्भवन्तत्रोपधारयेत् । सर्व्वभूतहितां चैत्र तथा पुष्पलतां विदुः । उपानहोस्तथा च्छेदोवस्त्रच्छेदस्तथैव च । कृत्स्नोभुवनकोशश्च गर्भाधानादिकं तथा निर्घातो भूमिकम्पश्च परिवेषास्तथैव च । ऋतुस्वभावाः सन्त्येवं तथोल्काश्चोपधारयेत् । सांवत्सरस्तथा युक्तः शास्त्राणां देशकोभवेत् । बलाबलं तु विज्ञेयं बहु यत्र बलं वदेत् । चतुःषष्ट्यङ्गमेतत्तु संवत्सरमुदाहृतमिति" । एवञ्च गणितादित्रयं प्रधानाङ्गत्वात् स्कन्धसंज्ञम् अन्यानि तु अप्रधानान्यङ्गानीति क्वचित् संक्षेपत उक्तानि, क्वचिच्च विस्तरत इति विशेषः । गर्गोक्तविभागाभिप्रायेणैव मुद्राराक्षसे "कृतपरिश्रमोऽस्मि चतुःषष्ट्यङ्गे ज्योतिषे" इति सूत्रधारवाक्यम् । बृहत्संहितायां तु गर्गोक्तान्येव प्रायशोऽङ्गानि प्रदर्शितानि तेषां स्वरूपादिकं तत्तच्छब्दे वक्ष्यते ।

दृश्यकाव्ये मुखप्रतिगर्भविमर्षोपसंहृतिरूपसन्धिपञ्चकस्य चतुःषष्टिरङ्गानि यथोक्तं साहित्यदर्पणे "उपक्षेपः परिकरः परिन्यासो विलोभनं । युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥ उद्भेदः करणं भेदः एतान्यङ्गानि वै मुखे"(इति मुखस्य १२) "विलासः परिसर्पश्च विधूतं तापसं तथा । नर्म्म नर्म्मद्युतिश्चैव तथा प्रशमनं पुनः ॥ विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम् । पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि" (इति प्रतिमुखस्य १३)॥ "अभूताहरणं मार्गो रूपोदाहरणं क्रमः । संग्रहश्चानुमानञ्च प्रार्थनाक्षिप्तिरेव च ॥ त्रोटकाधिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा (इति गर्भस्य१२) । "अपवादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः । शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥ प्ररोचना विमर्षे स्यादादानं छादनं तथा (इति विमर्षस्य १३) । "सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् । कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम् ॥ भाषणं पूर्व्ववाक्यञ्च काव्यसंहार एव च । प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः" (उप-